**!! अथ पूजा प्रारभ्यते!!**
**!! तत्रादौ स्थापना!!**

(अनुष्टुप् वृत्तम्)

**आगच्छागच्छ भो शान्ते! तिष्ठ तिष्ठात्र मण्डले।**
**प्रत्यूह-परिहारायाऽस्माकं सन्निकटो भव॥ १ ॥**

(इन्द्रवज्रा वृत्तम्)

**नामापि शान्तिस्-तव कर्म-शान्ति-र्धर्मोऽपि लोके परिरब्ध-शान्तिः।**
**हे नाथ! तेनाथ वयं श्रयामस्-त्वां जन्म-साफल्य-मतोऽत्र यामः॥ २॥**

ॐ ह्रीं सर्व-कर्मबन्धन-विमुक्त! सकल-विघ्न-शान्तिकर! सम्पूर्णोत्तम! मङ्गल-प्रद! पञ्चम-चक्रेश्वर! द्वादश-कामदेव! षोडशोत्तम-तीर्थङ्कर! अष्ट-प्रातिहार्य-संयुक्त! श्रीशान्तिनाथ-जिनेन्द्र! अत्र अवतर अवतर सम्वौषट्।

ॐ ह्रीं सर्व-कर्मबन्धन-विमुक्त! सकल-विघ्न-शान्तिकर! सम्पूर्णोत्तम! मङ्गल-प्रद! पञ्चम-चक्रेश्वर! द्वादश-कामदेव! षोडशोत्तम-तीर्थङ्कर! अष्ट-प्रातिहार्य-संयुक्त! श्रीशान्तिनाथ-जिनेन्द्र! अत्र तिष्ठ तिष्ठ ठः ठः।

ॐ ह्रीं सर्व-कर्मबन्धन-विमुक्त! सकल-विघ्न-शान्तिकर! सम्पूर्णोत्तम! मङ्गल-प्रद! पञ्चम-चक्रेश्वर! द्वादश-कामदेव! षोडशोत्तम-तीर्थङ्कर! अष्ट-प्रातिहार्य-संयुक्त! श्रीशान्तिनाथ-जिनेन्द्र! अत्र मम सन्निहितो भव भव वषट्।

**!! अथ स्तवनम्!!**

(शार्दूलविक्रीडितं वृत्तम्)

**न स्नेहाच्-छरणं प्रयान्ति भगवन्! पाद-द्वयं ते प्रजाः**
**हेतुस्-तत्र विचित्र-दुःख-निचयः संसार-घोरार्णवः।**
**अत्यन्त-स्फुर-दुग्र-रश्मि-निकर-व्याकीर्ण-भूमण्डलो-**
**ग्रैष्मः कारयतीन्दु-पाद-सलिलच्-छायानुरागं रविः॥ १॥**
**क्रुद्धाशी-र्विष-दष्ट-दुर्जय-विष-ज्वालावली विक्रमो**
**विद्या-भेषज-मन्त्र-तोय-हवनै-र्याति प्रशान्तिं यथा।**
**तद्-वत्ते चरणा-रुणाम्बुज-युग-स्तोत्रोन्मुखानां नृणां**
**विघ्नाः काय-विनायकाश्-च सहसा शाम्यन्त्यहो विस्मयः॥ २॥**
**सन्तप्तोत्तम-काञ्चन-क्षितिधर-श्रीस्पर्द्धि-गौरद्युते!**
**पुंसां त्वचरण-प्रणाम-करणात् पीडाः प्रयान्ति क्षयम्।**
**उद्यद्-भास्कर-विस्फुरत्-कर-शत-व्याघात-निष्कासिताः**
**नाना-देहि-विलोचन-द्युतिहरा शीघ्रं यथा शर्वरी॥ ३॥**

त्रैलोक्येश्वर! भङ्ग-लब्ध-विजया-दत्यन्त-रौद्रात्मकान्
नाना-जन्म-शतान्तरेषु पुरतो जीवस्य संसारिणः।
को वा प्रस्खलतीह केन विधिना कालोग्र-दावानलान्-
न स्याच्-चेत् तव पाद-पद्म-युगल-स्तुत्यापगा-वारणम्॥ ४॥
लोकालोक-निरन्तर-प्र-वितत-ज्ञानैक-मूर्ते! विभो!
नाना-रत्न-पिनद्ध-दण्ड-रुचिर-श्वेतात-पत्र-त्रय!।
त्वत्-पाद-द्वय-पूत-गीत-रवतः शीघ्रं द्रवन्-त्यामयाः
दर्पाध्मात-मृगेन्द्र-भीम-निनदाद्-वन्या यथा कुञ्जराः॥ ५॥
दिव्य-स्त्री-नयनाभिराम-विपुल-श्री-मेरु-चूडामणे!
भास्वद्-बाल-दिवाकर-द्युतिहर! प्राणीष्ट-भामण्डलम्।
अव्याबाध-मचिन्त्य-सार-मतुलं त्यक्तोपमं शाश्वतं
सौख्यं त्वच्-चरणारविन्द-युगल-स्तुत्यैव सम्प्राप्यते॥ ६॥
यावन्-नोदयते प्रभा-परिकरः श्री-भास्करो भासयँस्-
तावद्-धारयतीह पङ्कज-वनं निद्राति-भार-श्रमम्।
यावत् त्वच्-चरण-द्वयस्य भगवन्-न स्यात्-प्रसादोदयः
तावज्-जीव-निकाय एष वहति प्रायेण पापं महत्॥ ७॥
शान्तिं शान्ति-जिनेन्द्र-शान्त-मनसस्-त्वत्-पाद-पद्माश्रयात्
सम्प्राप्ताः पृथिवी-तलेषु बहवः शान्त्यर्थिनः प्राणिनः।
कारुण्यान्-मम भाक्तिकस्य च विभो! दृष्टिं प्रसन्नां कुरु
त्वत्-पाद-द्वय-दैवतस्य गदतः शान्त्यष्टकं भक्तितः॥ ८॥

(अनुष्टुप् वृत्तम्)

शान्त्यष्टकानि यस्यास्ते त्रिकालं च त्रि-शुद्धितः।
तस्य फलं यथायोग्यं पूज्यपादाय पृच्छ भो!॥ ९॥

## !! अथ अष्टकम्!!

(वसन्ततिलका वृत्तम्)

ये नित्य-मेव जल-सम्भृत-हेम-कुम्भ-
धारा-जलेन जिन-पाद-मिहार्चयन्ति।
ते निश्चयेन भुवने नृपतित्व-माप्य
राज्याभिषेक-मचिरेण नरा लभन्ते॥ १॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः जलं निर्वपमीति स्वाहा।

**कर्पूर-कुङ्कुम-रसेन सु-चन्दनेन**
**ये जैन-पाद-कमले परि-लेपयन्ति।**
**जायन्त एव भुवि ते च सुगन्ध-देहा-**
**दिव्याङ्गना-परिवृता सततं वसन्ति॥ २॥**

ॐ भ्रां भ्रीं भ्रूं भ्रौं भ्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः चन्दनं निर्वपमीति स्वाहा।

**येऽभ्यर्चयन्ति जिन-पुङ्गव-पाद-पद्मं**
**शाल्यक्षतै-रति-सितैः सकलैः सुगन्धैः।**
**दीर्घायुषो जगति ते च भवन्ति नूनं**
**नीरोगिणः कुसुम-शस्त्र-समा भवन्ति॥ ३॥**

ॐ म्रां म्रीं म्रूं म्रौं म्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः अक्षतान् निर्वपमीति स्वाहा।

**ये मल्लिका-बकुल-मालतिका-प्रसूनै-**
**रारक्त-शुभ्र-कमलै-र्वर-नाग-कुन्दैः।**
**तेऽभ्यर्चयन्ति जिन-पाद-सरोज-युग्मं**
**पुष्पोत्तरं सुर-विमान-मुपा-श्रयन्ति॥ ४॥**

ॐ रां रीं रूं रौं रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः पुष्पं निर्वपमीति स्वाहा।

**ये स्वर्ण-पात्र-विहितोज्ज्वल-शालि-भक्तं**
**सर्पिः-पयो-गुड-युतं बहु-भक्ष्य-युक्तम्।**
**दास्यन्ति देव-पुरतश्-चरुकं सु-भक्त्या**
**ते भोगिनो गत-रुजा धन-धान्य-वन्तः॥ ५॥**

ॐ घ्रां घ्रीं घ्रूं घ्रौं घ्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः नैवेद्यं निर्वपमीति स्वाहा।

**कर्पूर-निर्मित-समुज्ज्वल-दीपकेन**
**आरार्तिकं जिनवरस्य सदा-श्रयन्ति।**
**दैदीप्य-मान-मणि-रश्मि-मतीह हर्म्ये**
**तिष्ठन्ति ते जगति भव्य-जनाः सुखेन॥ ६॥**

ॐ झ्रां झ्रीं झ्रूं झ्रौं झ्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः दीपं निर्वपमीति स्वाहा।

**काल-गुरु-प्रभृतिभिः परि-कल्पितेन**
**धूपायने परि-मलेन च धूपजेन।**
**सम्भावयन् जिनप-पाद-सरोज-युग्मं**
**सौभाग्यवान् कुसुम-सायक-सन्-निभः स्यात्॥ ७॥**

ॐ श्रां श्रीं श्रूं श्रौं श्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः धूपं निर्वपमीति

स्वाहा।

**नारङ्ग-पूग-कदली-फल-नारिकेलैः**
**जम्बीर-चूत-पनसै-रपि शोभमानैः।**
**ये शान्तिनाथ-चरणौ सततं यजन्ते**
**ते वाञ्छितं फल-मनल्प-धियो लभन्ते॥ ८॥**

ॐ खां खीं खूं खौं खः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः फलं निर्वपमीति स्वाहा।

(अनुष्टुप् वृत्तम्)

**नीरादि-फल-पर्यन्तै-र्द्रव्यै-रर्हन्त-मर्चताम्।**
**सतां विघ्ना विनश्यन्ति दिशः कामान् दुहन्ति च॥ ९॥**

ॐ अ ह्रां सि ह्रीं आ ह्रूं उ ह्रौं सा ह्रः जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपमीति स्वाहा।

## !! अथ स्तवनम्!!

(अनुष्टुप् वृत्तम्)

**ॐकार-ज्ञान-रूपाय ह्रीं-मध्ये स्वामिने नमः।**
**स्थावरांगि-दयाङ्गाय एका-नेकात्मने नमः॥ १॥**
**श्रीमते चक्रि-नाथाय शान्ति-रूपात्मने नमः।**
**तिष्ठते ज्ञान-गर्भाय नाना-भाषात्मने नमः॥ २॥**
**स्वयं विहीन-वाञ्छाय गीत-पूतात्मने नमः।**
**शान्ताष्ट-कर्म-मूलाय तीर्थ-कर्त्रात्मने नमः॥ ३॥**
**अ-संकल्पित-रूपाय रामा-मुक्तात्मने नमः।**
**यत्याचारे च दक्षाय सर्वात्म-स्वात्मने नमः॥ ४॥**
**रत्न-त्रयेण युक्ताय बोध-व्याप्तात्मने नमः।**
**परत्र-सौख्य-दात्रे च द्रवी-भूतात्मने नमः॥ ५॥**
**वाचा विश्व-हितार्थाय शान्ति-नाथात्मने नमः।**
**तीव्र-विषाप-हाराय कुरु-वंशपते! नमः॥ ६॥**
**ऋषि-चित्त-प्रहर्षाय कुल-क्रमभृते नमः।**
**सदाद्भुत-सु-रूपाय ह्रीं-बीजे शायिने नमः॥ ७॥**
**नागेन्द्रवत्-सुधीराय मद्-विघ्न-नाशिने नमः।**
**स्वामि-संज्ञा-प्र-शोभाय भय-हर्त्रे नमो नमः॥ ८॥**
**शान्त्यष्टक-मिदं कण्ठे ये दधत्युरु-हारवत्।**
**तेषां गृहे सम्पदः स्यु-र्विपदो न कदापि तु॥ ९॥**

ॐ ह्रीं जगदापद्-विनाशनाय ह्रीं श्रीशान्तिनाथाय नमः स्तोत्रार्घ्यं निर्वपमीति स्वाहा।

अथ प्रथम-वलयस्याष्ट-कोष्ठोपरि पुष्पाञ्जलिं क्षिपामि।

### ( अष्ट-बीजाक्षरसंयुक्त-अर्घ्यावली )

(अनुष्टुप् वृत्तम्)

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**हं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ १॥**

ॐ ह्रीं अशोकतरुसत्प्रातिहार्यमण्डिताय अशोकतरुसत्प्रातिहार्यशोभनपदप्रदाय ह्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**भं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ २॥**

ॐ ह्रीं सुरपुष्पवृष्टि-सत्प्रातिहार्यमण्डिताय सुरपुष्पवृष्टि-सत्प्रातिहार्यशोभनपदप्रदाय भ्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**मं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ३॥**

ॐ ह्रीं दिव्यध्वनि-सत्प्रातिहार्यमण्डिताय दिव्यध्वनि-सत्प्रातिहार्यशोभनपदप्रदाय म्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**रं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ४॥**

ॐ ह्रीं चामरोत्तोलन-सत्प्रातिहार्यमण्डिताय चामरोत्तोलन-सत्प्रातिहार्यशोभनपदप्रदाय र्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**घं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ५॥**

ॐ ह्रीं सिंहासन-सत्प्रातिहार्यमण्डिताय सिंहासन-सत्प्रातिहार्यशोभनपदप्रदाय घ्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**झं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ६॥**

ॐ ह्रीं भामण्डल-सत्प्रातिहार्यमण्डिताय भामण्डल-सत्प्रातिहार्यशोभनपदप्रदाय झ्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**सं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ७॥**

ॐ ह्रीं दुन्दुभि-सत्प्रातिहार्यमण्डिताय दुन्दुभि-सत्प्रातिहार्यशोभनपदप्रदाय स्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**स्व-वर्गोपगतं पिण्डाक्षराग्निं बिन्दु-षट्-स्वरम्।**
**खं बीजेन प्रह्वः स्वघ्नं शान्तिनाथं नमाम्यहम्॥ ८॥**

ॐ ह्रीं छत्रत्रय-सत्प्रातिहार्यमण्डिताय छत्रत्रय-सत्प्रातिहार्यशोभनपदप्रदाय ख्म्ल्व्र्यूं बीजाय सर्वोपद्रवशान्तिकराय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**ह-भ-म-र-घ-झ-स-खान् बीज-वर्णान् विधानतः।**
**प्रलयं यान्तु विघ्नौघाः स्तोमेनार्घ्येण संयजे॥ ९॥**

ॐ ह्रीं प्रातिहार्याष्टसहिताय बीजाष्टमण्डनमण्डिताय सर्वविघ्नशान्तिकराय श्रीशान्तिनाथाय नमः पूर्णार्घ्यं निर्वपामीति स्वाहा।

## !! अथ द्वितीय-वलय-पूजा !!

अथ द्वितीय-वलयस्य षोडश-कोष्ठोपरि पुष्पाञ्जलिं क्षिपामि।

**( त्रैकालिक-पञ्च-परमेष्ठी-अर्घ्यावली )**

(तूणकं वृत्तम्)

**श्री-शतेन्द्र-योगि-वृन्द-वन्द्य-पाद-पङ्कजं**
**शाश्वतेद्ध-बोध-दृष्टि-वीर्य-सौख्य-भास्करम्।**
**सु-प्रशस्त-योग-दग्ध-घाति-कर्म-वैरिणं**
**श्री-जिनेन्द्र-देव-मेव-मर्चयाम्यहं सदा॥ १॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे भरतैरावतविदेहादिशतैकसप्ततिक्षेत्रार्यखण्डे भूत-भविष्यत्-वर्तमानार्हत्परमेष्ठिपदपङ्कजे सन्मति-सद्भक्त्युपेतामलतरखड्गोज्झित-निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**अष्ट-कर्म-वि-प्रमुक्त-मष्ट-सद्-गुणोज्ज्वलं**
**दुष्ट-भाव-दुःख-दाह-मिष्ट-माधुरा-गदम्।**
**सुष्ठु-दर्शनाव-लोक-नार्चितं तुलोज्झितं**
**तोष्टवीमि निष्ठितार्थ-मिद्ध-सिद्ध-सञ्चयम्॥ २॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे भरतैरावतविदेहादिशतैकसप्ततिक्षेत्रार्यखण्डे भूत-भविष्यत्-वर्तमान-सिद्धपरमेष्ठिपदपङ्कजे सन्मति-सद्भक्त्युपेतामलतरखड्गोज्झित-निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**आचरन्ति चारु-चित्त-पञ्चकं यतः स्वयं**
**चारयन्-त्यनुग्रहोरु-बुद्धितः समाश्रितान्।**
**शूर-मार-मल्ल-मान-मर्द्दकान् गुणोज्ज्वलान्**
**तान् शरण्य-भद्र-दाँश्च सूरि-संज्ञकान् यजे॥ ३॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे भरतैरावतविदेहादिशतैकसप्ततिक्षेत्रार्यखण्डे भूत-भविष्यत्-वर्तमानाचार्यपरमेष्ठिपदपङ्कजे सन्मति-सद्भक्त्युपेतामलतरखड्गोज्झित-निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**द्वादशाङ्ग–साङ्ग–बाह्य–शास्त्र–वार्द्धि–पारगान्**
**साधुवाद–वज्र–भिन्न–मत्त–वादि–भूधरान्।**
**साद्य–नाद्य–नन्त–सान्त–मोक्ष–मार्ग–देशकान्**
**आदरेण तान् यजामि पाठकान् गुणाम्बुधीन्॥ ४॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे भरतैरावतविदेहादिशतैकसप्ततिक्षेत्रार्यखण्डे भूत–भविष्यत्–वर्तमान–पाठक–परमेष्ठिपदपङ्कजे सन्मति–सद्भक्त्युपेतामलतरखड्गोज्झित–निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**मोक्ष–हेतु–भूत–धर्म–शुक्ल–योग–तत्परान्**
**दक्ष–चक्षु–रादि–दुष्ट–वादि–रोधन–क्षमान्।**
**अक्षयोरु–लक्ष–मेव सत्–कटाक्ष–वीक्षणान्**
**मोक्ष–सौख्य–साधु–सङ्गतान् यजामि सिद्धये॥ ५॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे भरतैरावतविदेहादिशतैकसप्ततिक्षेत्रार्यखण्डे भूत–भविष्यत्–वर्तमान–सर्वसाधुपरमेष्ठिपदपङ्कजे सन्मति–सद्भक्त्युपेतामलतरखड्गोज्झित–निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

## ( रत्नत्रय–वन्दना–अर्घ्यावली )

(अनुष्टुप् वृत्तम्)

**पञ्च–विंशति–दोषेभ्यो विमुक्तं साङ्ग–मुत्तमम्।**
**आप्तागम–पदार्थानां श्रद्धानं तदहं यजे॥ ६॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे शुद्ध–सम्यक्त्वामलतरखड्गोज्झित–निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(तूणकं वृत्तम्)

**त्रिंशता–समं शत–त्रयं च षट्–मते–र्विधात्**
**द्वादशाङ्ग–विस्तृतं स–पूर्व–मायतं श्रुतम्।**
**नीर–गन्ध–तण्डुलैस्–त्रिधावधिं च संयजे**
**केवलं परं मनःपर्ययं स्त्रगादिभिः॥ ७॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे सम्यग्ज्ञानामलतरखड्गोज्झित–निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**पञ्चभि–र्महाव्रतैः समं त्रि–गुप्ति–संयुतं**
**पञ्च–धा समित्युपेत–मित्यदो गुणोज्ज्वलम्।**
**सच्–चरित्र–मुत्तमं विना न मुक्ति–रित्यतो–**
**ध्यान–सिद्धि–कारकं तदेव सर्वदा यजे॥ ८॥**

ॐ ह्रीं जगदापद्विनाशनहेतवे सम्यक्चारित्रामलतरखड्गोज्झित–निदानबन्धनाय कृतेज्याय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

**यज्-ज्ञानावरणं कर्म पञ्च-प्रकृति-संयुतम्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ ९॥**

ॐ ह्रीं ज्ञानावरणकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**दर्शनावरणं कर्म नवप्रकृति-धारितम्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १०॥**

ॐ ह्रीं दर्शनावरणकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**वेदनीयं तु यत्कर्म सातासातविकल्पकम्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ ११॥**

ॐ ह्रीं वेदनीयकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**प्रचण्डमोहनीयं यदष्टाविंशतिभेदभृत्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १२॥**

ॐ ह्रीं मोहनीयकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**भवप्रिया कर्मणां या चतुःप्रकृतिसंततिः।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १३॥**

ॐ ह्रीं आयुष्-कर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**नामकर्म यदाख्यातं सप्तोनशतभेदभृत्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १४॥**

ॐ ह्रीं नामकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**गोत्रकर्म समाख्यातं प्रशस्तं चाप्रशस्तकम्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १५॥**

ॐ ह्रीं गोत्रकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**अन्तरायाभिधं कर्म पञ्चप्रकृतिनायकम्।**
**तन्-निर्मूलन-सिद्ध्यर्थं दया-कान्तं जिनं यजे॥ १६॥**

ॐ ह्रीं अन्तरायकर्ममहाबन्ध-बन्धनकृते सति तत्कर्म-विपाकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

**दर्शन-ज्ञान-चारित्र-धारकान् परमेष्ठिनः।**
**स्वभाव-मनु-युञ्जानान् यजे पूर्णार्घ्यतोऽधुना॥ १७॥**
ॐ ह्रीं पञ्चपरमेष्ठिपददायकाय दर्शनज्ञानचारित्रकारकाय कर्माष्टकवारकाय श्रीशान्तिनाथाय नमः षोडशाङ्ग-द्वितीयवलयमध्ये पूर्णार्घ्यं निर्वपामीति स्वाहा।

## !! अथ तृतीय-वलय-पूजा !!

सद्-भक्ति-कृत-भारेण निजावासाज्-जिनालये।
आया-दिन्द्रः स-गीर्वाणः सम्यग्दर्शन-सिद्धये॥
अथ तृतीय-वलयस्य द्वात्रिंशत्-कोष्ठोपरि पुष्पाञ्जलिं क्षिपामि।

## ( चतुर्णिकाय-देवार्चित-श्रीशान्तिनाथ-अर्घ्यावली )

(अनुष्टुप् वृत्तम्)

असुरेन्द्र-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १॥
ॐ ह्रीं असुरकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

धरणेन्द्र-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २॥
ॐ ह्रीं नागकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

श्रीमद्-विद्युत्-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ३॥
ॐ ह्रीं विद्युत्कुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सुपर्णेन्द्र-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ४॥
ॐ ह्रीं सुपर्णकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

पावकेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ५॥

ॐ ह्रीं अग्निकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

वातेन्द्र-सु-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ६॥
ॐ ह्रीं वातकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

स्तनितेन्द्र-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ७॥
ॐ ह्रीं स्तनितकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

उदधीन्द्र-कुमारेण परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ८॥
ॐ ह्रीं उदधिकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

द्वीपेन्द्रेण कुमारेणपरिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ९॥
ॐ ह्रीं द्वीपकुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

दिक्-कुमारेन्द्र-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १०॥
ॐ ह्रीं दिक्कुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

किन्नरेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ११॥
ॐ ह्रीं किन्नरेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

किम्पुरुषेन्द्र-देवेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १२॥
ॐ ह्रीं किम्पुरुषेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

महो-रगेन्द्र-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १३॥
ॐ ह्रीं महोरगेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

गन्धर्वेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १४॥
ॐ ह्रीं गन्धर्वेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

यक्षेन्द्रेण सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १५॥
ॐ ह्रीं यक्षेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

राक्षसेन्द्रेण भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १६॥
ॐ ह्रीं राक्षसेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

भूतेन्द्रेण सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १७॥
ॐ ह्रीं भूतेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

पिशाचेन्द्रेण भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १८॥
ॐ ह्रीं पिशाचेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

तारकाणा-मधीशेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ १९॥
ॐ ह्रीं चन्द्रनामकेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

भास्करेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २०॥
ॐ ह्रीं भास्करेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सौधर्मेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २१॥
ॐ ह्रीं सौधर्मेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

ईशानेन्द्र-सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २२॥
ॐ ह्रीं ईशानेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सनत्कुमार-देवेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २३॥
ॐ ह्रीं सनत्कुमारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

माहेन्द्रेण सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २४॥
ॐ ह्रीं माहेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

ब्रह्मेन्द्रेण सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २५॥
ॐ ह्रीं ब्रह्मेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

लान्तवेन्द्र-सु-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २६॥
ॐ ह्रीं लान्तवेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

शुक्रेन्द्रेण सुभावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २७॥
ॐ ह्रीं शुक्रेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

शतारेन्द्रेण भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २८॥
ॐ ह्रीं शतारेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

आनतेन्द्रेण भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ २९॥
ॐ ह्रीं आनतेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

प्राणतेन्द्र-सु-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ३०॥
ॐ ह्रीं प्राणतेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

आरणेन्द्र-सु-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ३१॥
ॐ ह्रीं आरणेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

अच्युतेन्द्र-सु-भावेन परिवार-भृता सता।
कृता द्रव्याष्ट-केनार्चा शान्ति-सद्-गुण-सिद्धये॥ ३२॥
ॐ ह्रीं अच्युतेन्द्रेण स्वपरिवारसहितेन पादपद्मार्चिताय जिननाथाय तथैव वरप्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

भावन-व्यन्तर-ज्योतिः-स्वर्ग-प्रमुखवासिनः।
द्वात्रिंश-दिन्द्रान् यज्ञेऽस्मिन् आह्वयामि मुदा-र्हते॥ ३३॥
ॐ ह्रीं चतुर्णिकाय-देवेन्द्र-पूजिताय श्रीशान्तिनाथाय नमः द्वात्रिंशदङ्ग-तृतीयवलयमध्ये पूर्णार्घ्यं निर्वपामीति स्वाहा।
या यापि देवता स्थाने यत्र यत्र प्रवर्तते।
समागच्छतु सामुष्मिन् जिनयज्ञ-महोत्सवे॥

## !! अथ चतुर्थ-वलय-पूजा !!

अथ चतुर्थ-वलयस्य चतुःषष्ठि-कोष्ठोपरि पुष्पाञ्जलिं क्षिपामि।

## ( अशुभोदय-क्षयार्थं द्वात्रिंशत्-अर्घ्यावली )

(उपजातिः वृत्तम्)

चित्तेन दृब्धं बहु-रूप-मेनः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १॥
ॐ ह्रीं मानसिक-पापोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

वाक्येन दृब्धं बहु-रूप-मेनः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २॥
ॐ ह्रीं वाचनिक-पापोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

कायेन दृब्धं बहु-रूप-मेनः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ३॥
ॐ ह्रीं कायिक-पापोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

च्युत्याथ-लक्ष्मी-पुर-राज्य-गेहात् तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ४॥
ॐ ह्रीं जिनराज-लक्ष्मी-पुर-राज्य-गेह-पदभ्रष्टोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

पूर्वार्जिताघाद्-विपदो ह्यनेकाः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ५॥
ॐ ह्रीं दारिद्र्योद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

जलोदराद्या बहुशोऽपि रोगा: तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ६ ॥
ॐ ह्रीं भीम-भगन्दर-गलित-कुष्ट-गुल्म-रक्त-पित्त-वात-कफ-स्फोटकाद्युपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

इष्ट-च्युतिश्-चैव-मनिष्ट-योग: तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ७ ॥
ॐ ह्रीं इष्टवियोगानिष्टसंयोगोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

चक्रे स्वकीये-तरके परोक्षे तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ८ ॥
ॐ ह्रीं स्वचक्र-परचक्रोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

नानाख्य-शस्त्रं भुवन-त्रयस्थं तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ९ ॥
ॐ ह्रीं विविधायुधोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

दुष्टाशय:कञ्चर-पापकारी तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १० ॥
ॐ ह्रीं दुष्ट-जलचरजीवोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

चतुष्-पदोङ्गी वन-पर्वतस्थ: तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ११ ॥
ॐ ह्रीं व्याघ्र-सिंह-गजादि-वन-पर्वतवासि-श्वापदाद्युपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

भूस्था: नभस्था: अपि हिंस्त्र-जीवा: तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १२ ॥
ॐ ह्रीं भूचर-गगनचर-क्रूर-जीवोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नम: अर्घ्यं निर्वपामीति स्वाहा।

हालाहलक्ष्वेडभृतोऽङ्गिनो ये तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १३॥
ॐ ह्रीं व्याल-वृश्चिकादि-विष-दुर्द्धरोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

ये शृङ्गिणो वा नखिनोऽति-तीव्राः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १४॥
ॐ ह्रीं दुष्टजीव-पद-कर-नखोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

से दंष्ट्रिणः कण्टकिनोऽथवा ये तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १५॥
ॐ ह्रीं चञ्चु-तुण्ड-दाढा-कण्टकोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

अत्युग्र-दावाग्नि-नभ-स्थलान्ता तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १६॥
ॐ ह्रीं दावानलोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

कल्पान्त-कालोपम-वायु-वेगाः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १७॥
ॐ ह्रीं प्रचण्ड-पवनोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

यानात्-पतत्-सिन्धु-सरित्सु-देवा तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १८॥
ॐ ह्रीं नौका-स्फुटित-पतनोद्भवोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।
भयानकै-र्भू-वन-पर्वताद्यैः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ १९॥
ॐ ह्रीं वन-नग-मेदिनी-भयङ्करोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सरित्-सरोब्धि-ह्रद-कूप-वाप्यः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २०॥
ॐ ह्रीं नदी-सरोवराब्धि-कूप-ह्रदोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

तडित्-पतन्-मेघ-नवाम्बु-वृष्टिः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २१॥
ॐ ह्रीं विद्युत्पातादि-भीमाम्बु-वृष्ट्युपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

रणाङ्गणेऽरि-र्निकट-प्रपन्नः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २२॥
ॐ ह्रीं संग्रामस्थलारि-निकटोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

ये शाकिनी-डाकिनिका-पिशाचाः तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २३॥
ॐ ह्रीं शाकिनी-डाकिनी-भूत-प्रेत-पिशाचादि-भय-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

उच्चाटन-स्तम्भन-मोहनञ्च तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २४॥
ॐ ह्रीं मोहन-स्तम्भनोच्चाटन-प्रमुख-दुष्ट-विद्योपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

दुष्ट-ग्रहाणा-मुदयोऽति-तीव्रास्-तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २५॥
ॐ ह्रीं दुष्ट-ग्रहाद्युपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

आवेष्टिताङ्गा दृढ-शृङ्खलाद्यैस्-तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २६॥
ॐ ह्रीं शृङ्खलाद्युपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

अल्पायु-रित्युग्र-तरा-मनस्यं तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २७॥
ॐ ह्रीं अल्पमृत्यूपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

शस्याद्य-नुत्पत्ति-वशेन दुःखं तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २८॥
ॐ ह्रीं दुर्भिक्षोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

उद्योगिताया-मपि नास्ति लाभस्-तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ २९॥
ॐ ह्रीं व्यापार-वृद्धि-रहितोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सम्बन्ध्यपत्यं न ततोऽपि दुःखं तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ३०॥
ॐ ह्रीं बन्धुत्वोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

रमा न रामा न च वंश-हेतुस्-तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ३१॥
ॐ ह्रीं अकुटुम्बत्वोपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

पापोदयाद्-दुर्यश एव लोके तदुद्भवा व्याधि-रुपैति या माम्।
तद्-विघ्न-शान्तिस्-तव पूजनेन श्रीशान्तिनाथाय नमोऽस्तु तुभ्यम्॥ ३२॥
ॐ ह्रीं अपकीर्त्युपद्रव-निवारकाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

### ( शुभोदय-फलात्मक-द्वात्रिंशत्-अर्घ्यावली )

विश्वस्य कल्याण-गुणाय दक्षं हेतुं श्रियोऽर्हन्-निति नामधेयम्।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३३॥
ॐ ह्रीं सम्पूर्ण-कल्याण-मङ्गल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

शर्मोदधिं केवल-बोध-भाजं चिन्तामणिं वाञ्छित-वस्तु-दाने।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३४॥
ॐ ह्रीं चिन्तामणि-समान-चिन्तित-फल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

कल्प-द्रुवद्-देहवतां पुनीतं तापापहं सौख्य-करं श्रितानाम्।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३५॥
ॐ ह्रीं कल्पवृक्षोपम-कल्पितार्थ-फल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

नाम-स्मृति-र्यस्य हि कामधेनु-र्मनोरथं पूरयति प्रभो-र्नः।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३६॥
ॐ ह्रीं कामधेनूपम-कामनापूर्ण-फल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

महात्मने धर्म-धुरन्धराय यतीश्वराः संस्पृहयन्ति यस्मै।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३७॥
ॐ ह्रीं परमोज्ज्वल-धर्मध्यान-बाधारहित-अनवद्य-बोध-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

लोक-त्रयी-नेत्र-महोत्सवाय कायो यदीयोप्युदुतोन्युपायः।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३८॥
ॐ ह्रीं कामदेव-स्वरूप-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

सौगन्ध्य-माप्नोति तनौतु तादृक् न चन्दने नाम्बु-रुहेऽपि यादृक्।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ३९॥
ॐ ह्रीं सुगन्ध-शरीर-युक्त-भव-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

भव्याम्बुजाह्लाद-करं पवित्रं भामण्डलं भास्करवत् तु यस्य।
तीर्थेश्वरं चक्रि-पदेन युक्तं श्री-कामदेवोक्ति-धरं यजामि॥ ४०॥
ॐ ह्रीं त्रैलोक्यनाथाह्लाद-कारक-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(वसन्ततिलका वृत्तम्)

क्षीराब्धि-शुभ्र-किरणोत्कर-लोक-पूर्णं
डिण्डीर-पिण्ड-धवलोत्तम-सद्-गुणाढ्यम्।
गायन्ति देव-निकरा बहु-भक्ति-युक्ताः
स्वात्म-स्थितं गुण-गणं नितरां लभन्ते॥ ४१॥
ॐ ह्रीं परमोज्ज्वल-गुण-गण-सहित-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।



(उपजातिः वृत्तम्)

बुद्धे-र्विशुद्धि-प्रतिपद्य-तत्त्व-प्रकाशने याति-तमां महत्त्वम्।
वाचस्पतिञ्-चाप्यति-वर्तमानः श्रीवर्द्धमानोभ्यवतात्-सदानः॥ ४२॥
ॐ ह्रीं वाचस्पति-समान-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

नवापि नित्यं निधयोऽधिकारात् रत्नानि तत्त्व-द्वि-गुणानि चारात्।
नमन्ति देवा मनुजाः खगाश्-च पादा-वुदारौ जिन-पूजकस्य॥ ४३॥
ॐ ह्रीं चक्रवर्ति-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

रमापि यस्याः पद-पद्म-दासी मनोज-कान्ताऽपि सु-रूप-राशिः।
एतादृशी स्त्री च भवेन्-नरस्य जिनेन्द्र-देव-स्तव-कारकस्य॥ ४४॥
ॐ ह्रीं उभयकुल-कमल-विकाशन-सूर्यांशु-समाचरण-प्रतिष्ठित-गुणमण्डित-अत्यन्त-सुन्दराकृति-पुत्रवन्ति-गेहिनी-मण्डन-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

समर्चना-संस्तव-वन्दनानि दत्त्या समं श्रावक-सद्-व्रतानि।
तेषा-मिदानी-मुपलब्धि-बुद्धि-र्भवेज्-जनानां जिन-पूजनेन॥ ४५॥
ॐ ह्रीं श्रावक-सद्वृत्त-करण-बुद्धि-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

शरत्-काल-कला-पूर्णा समस्ताह्लाद-कारिणी।
इन्द्रस्य भुवने कीर्तिः श्रीशान्ति-जिन-पूजनात्॥ ४६॥
ॐ ह्रीं परमोज्ज्वल-कीर्ति-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(उपजातिः वृत्तम्)

श्रेयां नराधीश इवाधिकारी कुबेर-देवोपम-पुण्य-कोशः।
श्रीदान-वीरत्व-पदस्य मर्त्यः भवेज्-जिनाधीश्वर-पूजनेन॥ ४७॥
ॐ ह्रीं गर्वरहित-परमलक्ष्मी-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

तिर्यङ्-नरक-गत्योश्-च स्वप्नेऽपि गमनं न वै।
नर-देव-गती लोके भवतो जिन-पूजनात्॥ ४८॥
ॐ ह्रीं नरक-तिर्यञ्च-गतिरहित-नर-सुर-गतिसहित-भव-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(उपजातिः वृत्तम्)

तीर्थङ्करत्वं भुवि दुर्लभं यद्-यतस्-त्रिलोक्यास्-तिलकत्व-मेति।
तस्याधुना षोडश-कारणानि प्राप्नोति मर्त्यो जिन-पूजनेन॥ ४९ ॥

ॐ ह्रीं षोडशकारण-भावना-साधन-बल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

तीर्थङ्करत्वं भुवि दुर्लभं यच्-छ्री-षोडश-स्वप्न-ततिं प्रशस्ताम्।
प्रागेव यस्याधि-करोति माता हस्त-स्थितं तज्-जिन-पूजकस्य॥ ५० ॥

ॐ ह्रीं जिनजननी-तुल्यैक-जननी-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

तीर्थङ्करत्वं भुवि दुर्लभं यज्-जन्माभिषेकः सुर-शैल-मूर्ध्नि।
प्र-क्रम्यते देव-गणै-र्यदस्य हस्त-स्थितं तज्-जिन-पूजकस्य॥ ५१ ॥

ॐ ह्रीं मेरुशिखरे स्नानयुक्त-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

अनन्त-शर्मदा दीक्षा सिद्धानां साक्षि-पूर्विका।
सम्भवेद्-भव्य-जीवानां पूजने-नार्हतां तथा॥ ५२ ॥

ॐ ह्रीं सिद्धसाक्षि-दीक्षाकारि-भव-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

वज्र-वृषभ-नाराच-संहननं च मोक्षदम्।
इत्थं शरीर-मिच्छामि मोक्षदं जिन-शासनात्॥ ५३ ॥

ॐ ह्रीं वज्रवृषभ-नाराच-संहनन-युक्त-मुक्तिकारक-भव-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

दर्शनं ज्ञान-चारित्रं यथाख्यातं जिनागमे।
तथैव पालने शक्तिं दधाति जिन-पूजकः॥ ५४ ॥

ॐ ह्रीं यथाख्यात-रत्नत्रयाचरण-युक्त-बल-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

स्वात्म-ध्यानामृत-स्वादं चिदानन्दं विना परम्।
न जानाति स जानाति जिनाख्या-श्रित-मद्भुतम्॥ ५५ ॥

ॐ ह्रीं स्वात्म-ध्यानामृत-स्वाद-सहित-भव-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

यस्मिन् समवशरणे भव्या शृण्वन्ति देहिनः।
धर्मामृतं तदाप्नोति जिनदेवस्य पूजनात्॥ ५६॥
ॐ ह्रीं समवशरण-विभूति-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

दिव्यध्वनि-रहो-रात्रे भवेद्-वार-चतुष्टयम्।
एतादृशी भवेच्-छक्तिः पूजनेन किलार्हतः॥ ५७॥
ॐ ह्रीं सत्केवलज्ञान-विभूति-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

अष्ट-कर्म-विनिर्मुक्तं गुणाष्टक-समन्वितम्।
निरञ्जनं पदं देव-पूजने-नाप्यते जनैः॥ ५८॥
ॐ ह्रीं निरञ्जन-पद-प्रदाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

चित्तानन्द-करं दृष्ट्वा जिनाङ्घ्रि-कमल-द्वयम्।
तथैवानन्द-दातारं सद्-गुणौघ-महं यजे॥ ५९॥
ॐ ह्रीं चिदानन्द-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

वाक्यानन्द-करं श्रुत्वा पठन् जिन-गुणोच्चयम्।
तथैवानन्द-दातार-मास्या-लङ्कार-मर्चये॥ ६०॥
ॐ ह्रीं कायानन्द-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

कायानन्द-करं दृष्ट्वा जात-रूपं धरं परम्।
तथैवानन्द-दातारं जिनराज-महं यजे॥ ६१॥
ॐ ह्रीं कायानन्द-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

मनसा स्मरणं कृत्वा तत्फल-मर्थ-वर्गदम्।
शान्तिनाथार्चने पुण्यात् किं चित्र-मर्थ-साधनम्॥ ६२॥
ॐ ह्रीं अर्थ-वर्ग-सिद्ध-साधन-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।
वाक्येन स्तवनं कृत्वा तत्फलं काम-वर्गदम्।
शान्तिनाथार्चने पुण्यात् किं चित्रं काम-साधनम्॥ ६३॥
ॐ ह्रीं काम-वर्ग-साधन-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

कायेन पूजनं कृत्वा तत्फलं मोक्ष-वर्गदम्।
शान्तिनाथार्चने पुण्यात् किं चित्रं मोक्ष-साधनम्॥ ६४॥

ॐ ह्रीं मोक्ष-वर्ग-साधन-सिद्ध-करण-समर्थाय श्रीशान्तिनाथाय नमः अर्घ्यं निर्वपामीति स्वाहा।

ऋद्ध्यङ्क-कोष्ठ-संयुक्ते चतुर्थ-वलये स्थितान्।
देवाधि-देवा-नत्राहं भक्त्या पूर्णार्घ्यतो यजे॥ ६५ ॥
ॐ ह्रीं चतुःषष्ठि-ऋद्धि-समानाङ्गाय श्रीशान्तिनाथाय नमः पूर्णार्घ्यं निर्वपामीति स्वाहा।

शून्याक्षि-चन्द्र-सम्मान-देवानां परि-मण्डलम्।
पूर्णार्घ्यतोऽह-मर्चामि भुवि विघ्नोप-शान्तये॥ ६६ ॥
ॐ ह्रीं शतैकविंशति-गुण-पूजिताय श्रीशान्तिनाथाय नमः पूर्णार्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

विनार्हन्तं न जीवानां शरणं समुद्-वीक्ष्यते।
बुऽतां नौ-रिवालम्बः जिनपूजा भवाम्बुधौ॥
इतीष्ट-प्रार्थना-पुष्पाञ्जलिं क्षिपामि।

**!! अथ जाप्य-मन्त्रः!!**

ॐ ह्रीं जगच्छान्तिकराय श्रीशान्तिनाथाय नमः सर्वोपद्रव-शान्तिं कुरु कुरु ह्रीं नमः स्वाहा।

**!! अथ जयमालिका !!**

(गाथा वृत्तम्)

द्वादश-संख्यं रते-रधीशं पञ्चम-मेवं चक्रीशम्।
षोडश-मधुना सुजिनाधीशं प्रणमामि सदा शान्तीशम्॥ १ ॥

(पादाकुलक-वृत्तम्)

जय भवनिधि-तारक शान्तिनाथ जय कर्मविदारक शान्तिनाथ।
जय विघ्न-निवारक शान्तिनाथ जय मोह-प्रहारक शान्तिनाथ॥ २ ॥
जय सद्गुण-धारक शान्तिनाथ जय मङ्गल-कारक शान्तिनाथ।
जय हित-सुविचारक शान्तिनाथ जय मन्मथ-मारक शान्तिनाथ॥ ३ ॥
जय पाप-विखण्डन शान्तिनाथ जय जन-मुख-मण्डन शान्तिनाथ।
जय ज्ञान-विभाकर शान्तिनाथ जय दृक्-शोभाकर शान्तिनाथ॥ ४॥
जय सम्यक्-साधन शान्तिनाथ जय सुगते-राराधक शान्तिनाथ।
जय कुगति-गृहार्गल शान्तिनाथ जय दुःख-हनन-शुभ शान्तिनाथ॥ ५ ॥
जय शान्तिनाथ जगतां मातः जय भुवन-त्रय परमपिताऽतः।

जय शान्तिनाथ परमार्थ-मते जय हित-संदेशक देहभृते॥ ६ ॥
जय रोग-शोक-हर शान्तिनाथ जय सम्पत्ति-सुकर शान्तिनाथ।
जय शान्तिनाथ शिव-सुख-कारिन् जय शान्तिनाथ भव-भय-हारिन्॥ ७॥
जय शान्तिनाथ जय-मद-मर्दन जय शान्तिनाथ गुण-गण-वर्धन।
जय भूत-पिशाच-भयापहार जय तस्कर-कृत-दुःखोपचार॥ ८॥
जय जय भो-ग्रह-बाधापकार जय विगत-व्यालादिप-प्रचार।
जय भव्य-कमल-बोधन-दिनेश जय चिदानन्द-कारक जिनेश॥ ९ ॥
ॐ ह्रीं श्रीशान्तिनाथाय नमः जयमाला-पूर्णार्घ्यं निर्वपामीति स्वाहा।

(अनुष्टुप् वृत्तम्)

कर्मा-धिष्ठित-जीवेन पाप-मर्जित-मञ्जसा।
दधे तत् क्षालनायेष्टां शान्तिधारां जिनाङ्घ्रये॥
शान्तये शान्तिधारा।